M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 154
Title: Sikshe Chatushtaya

	~~[illegible]~~	Title
	Sikshachatustaya	Author
	([illegible])	Editor
	[illegible]	Year, Vols.
		Publisher
134		Remarks

(13

134

श्री श्रीः

॥शिक्षाचतुष्टयप्रारंभः॥

श्री श्रीः

श्रीगणेशायनमः ॥ ॐ॥ मयरसतजभनलगसंमितंभ्रमतिवाङ्मयंजगतियस्य ॥ सजयतिपिंगलनागः
शिवप्रसादाद्विशुद्धमतिः ॥ त्रिगुरुंविद्धिमकारंलघ्वादिसमन्वितंयकाराख्यं ॥ लघुमध्यमंतुरेफंसकारमंतेगुरु
निर्दिष्टं लघ्वंत्यंहितकारंजकारमुभयोर्लघुंविजानीयात् आदिगुरुंचभकारंनकारमिहपिंगलेत्रिलघुं दी
र्घंसंयोगपरंतथाप्लुतंव्यंजनांतमूष्मांतं सानुस्वारंचगुरुंक्वचिदवसानेपिलघ्वंत्यं आदिमध्यावसानेषु
यरतायांतिलाघवं भजसागौरवंयांतिमनौतुगुरुलाघवं त्रिविरामंदशवर्णंषण्मात्रमुवाचपिंगलः
सूत्रं छंदोवर्गपदार्थस्तत्ययहेतोश्चशास्त्रादौ . १ श्रीश्रीखंडम् वरामायु कागुहारु वसुधासु सा
नेकुन् करासजू किंवदम् नहसन् गलू गने धादियरः हे लौसः ग्लौ अशोवसवहीति

छंदः

१ २ छंदः गायत्री दैव्येकं आसुरीपंचदश प्राजापत्याष्टौ यजुषांषट् साम्नांद्विः ऋचांत्रिः द्वौद्वौसा
म्नांवर्धेत त्रींस्त्रीनृचाम् चतुरश्चतुरःप्राजापत्यायाः एकैकंशेषे नद्यादासुरी तान्युष्णिगनुष्टुबृ
हतीपङ्क्तित्रिष्टुब्जगत्यः तिस्रस्तिस्रःसनाम्न्यएकैकाब्राह्म्यः प्राग्यजुषामार्ष्यइति २ पादः इया
दिपूरणः गायत्र्यावसवः जगत्याआदित्याः विराजोदिशः त्रिष्टुभोरुद्राः एकद्वित्रिचतुष्पादुक्तपा
दं आद्यंचतुष्पादृतुभिः क्वचित्त्रिपादृषिभिः सापादनिचृत् षट्कसप्तकयोर्मध्येष्टावतिपादनिचृ राम
त् द्वौनवकौषट्कश्चनागी विपरीतावाराही षट्कसप्तकाष्टकैर्वर्धमाना विपरीताप्रतिष्ठा तृ १
तीयंद्विपाज्जागतगायत्राभ्यां त्रिपात्त्रैष्टुभैः उष्णिग्गायत्रौजागतश्च ककुम्मध्येचेदन्त्यः पुरउ

पि
ष्णिक्पुरः ४ परोष्णिक्परः चतुष्पात्त्रिभिः अनुष्टुब्गायत्रैः त्रिपात्क्वचिज्जागताः
भ्यांच मध्येन्तेच बृहतीजागतस्त्रयश्चगायत्राः पथ्यापूर्वश्चेत्तृतीयः न्यंकुसारिणी
द्वितीयः स्कंधोग्रीवीक्रौष्टुकेः उरोबृहतीयास्कस्य उपरिष्टाद्बृहत्यंते पुरस्ताद्बृह
तीपुरः क्वचिन्नवकाश्चत्वारः वैराजोगायत्रश्च त्रिभिर्जागतैर्महाबृहती सतोबृ
हतीताण्डिनः पंक्तिर्जागतौगायत्रौच पूर्वौचेद्युजौसतःपंक्तिः विपरीतौच ५आ
स्तारपंक्तिःपरतः ५ प्रस्तारपंक्तिःपुरतः विष्टारपंक्तिरंततः संस्तारपंक्तिर्बहिः
अक्षरपंक्तिःपंचकाश्चत्वारः द्वावप्यल्पशः पदपंक्तिःपंच चतुष्कषट्कौत्रयश्च

छं॰ द॰

२

पंथ्यापंचभिर्गायत्रैः जगतीषड्किः एकेनत्रिष्टुब्ज्योतिष्मती। तथाजगती पुरस्ताज्ज्योतिःप्रथमे
न मध्येज्योतिर्मध्यमेन उपरिष्टाज्ज्योतिरंत्येन एकस्मिन्पंचके छंदःशंकुमती षट्के ककुम्मती
त्रिपादणिष्ठमध्या पिपीलिकमध्या विपरीतायवमध्या ऊनाधिकेनैकेननिचृद्भुरिजौ द्वा
भ्यांविराट्स्वराजौ आदितःसंदिग्धे ६ देवतादितश्च अग्निःसवितासोमोबृहस्प
तिर्मित्रावरुणाविंद्रोविश्वेदेवादेवताः स्वराःषड्जऋषभगांधारमध्यमपंचमधैवतनि
षादाः सितसारंगपिशंगकृष्णनीललोहितगौरावर्णाः आग्निवेश्यकाश्यपगोतमां
गिरसगार्ग्यकौशिकवासिष्ठानिगोत्राणि श्यामान्यनिछंदांसि रोचनान्यन्यःजयः अ २

न्युक्तानीकामतोवर्णाइति ७ चतुःशतमुत्कृतिः चतुरश्चतुरस्त्यजेदुत्कृतेः ता
न्यभिसंख्याप्रेभ्यःकृतिः प्रकृत्याचोपसर्गवर्जितः ध्वस्टिराकृरीजगत्यः
पृथक्पृथक्पूर्वतएतान्येवेषां द्वितीयंद्वितीयमतिनः अथलौकिकं आत्रै
ष्टुभाद्यदार्षे पादश्चतुर्भागः यथावृत्तसमाप्तिर्वा ल८ समुद्रागणाः गौगं
तमध्यादिन्लश्च स्वराअर्धंचार्यार्धं अत्राय्यु ऊ ज्र नगोज्र न्लौवा न्लौवे
त्पर्दद्वितीयादि सप्तमःप्रथमादि अंत्येपंचमः ८ षष्ठश्चलः त्रिपुगणे
षुपादःपथ्याद्येच विपुलान्या चपलाद्वितीयचतुर्थौग्मध्येजौ पूर्वेमु

रपूर्वं नवन्तूक्तेन्तर उत्तयोर्महान्यपला आर्यार्धसमागीतिः अन्त्येनोपगीतिः उत्क्रम
णादुद्गीतिः अर्धेवलनगणाआर्यागीतिः वैतालीयं द्विस्वराअयुक्पादेयुग्वसवोनेर्लौः गोप
च्छंदसिकं आपातलिकाख्योग्ग्रे शेषपरयुक्पदसाके षड्भामिश्राश्रयुजि पंचमेनपूर्वः साकमा
ख्यायुचि· अस्युक्प्रत्तीयेनोदीच्यवृत्तिः आस्यांयुगपत्प्रवृत्तकं अयुक्कासुहासिनी युग
पातिका· गताद्विर्वसवोमात्रासमकं नवमः द्वादशश्चवानवासिका विश्लोकः पंचमा
ष्टमौ चित्रानवमश्च परयुक्तेनोपचित्रा एभिःपादाकुलकं गीत्यार्याल· शिखाविपर्य
स्तार्थौ· कःपूर्वमेवोतिः गत्वेसौम्या चूलिकैकाधिंशदेकत्रिंशदंतेय समयिनन स

मालागलितं १० वक्त्रौसममर्धसमंविषमंच सर्मंतावल्कलः कृतमर्धसमंविषमंच राम्य
ने। म्लितिसमानी लीलानिप्रमाणी वितानमन्यत पादस्यानुष्टुभ्यक्रं नप्रथमा
त्स्नौ द्वितीयचतुर्थयोरश्च वान्यत्र यचतुर्थात् पथ्यायुजोज। विपरीतैकीयं रपला
युजोन विपुलायुग्लः सप्तमः सर्वतः सैतवस्य भोन्तोच प्रतिपादंचतुर्थ्यापदचतु
र्ष्व गावंतआपीडः ११ गावादोचेत्प्रत्यापीडः प्रत्यापीडोगावादोच प्रथमस्यावि
पर्यासेमंजरी लवल्यमृतधाराः उद्गतामेकतःस्जौ स्लौन्सौजोभ्नौ ज्लौकेस्लो स्लोग् च
तीयेसौरभकेन्नौभौ ललितंनौसौ उपस्थितप्रचुपितंप्रथमादस्सौ ज्भौगोन्लौ ज्रौ

छंद

न्नौ स्नौ न्नौग्नू वर्धमानं तत्वीयेनौ स्नौ स्नौ शुद्धविराडृषभसंज्ञौः अर्धे उपचित्रकं सौ

सौ स्नौ भौ गा द्रुतमध्या भौ भौ ग्न्जौ जौ वेगवती सौ सौ भौ भौ गा भद्रविराड् त्जौ गौ

५ जो मौ गा केतुमती सौ जौ सौ गौ नौ गौ आख्यानकी तौ जौ जौ गौ विपरीताख्यानकी ज्तौ

जौ गौ [illegible] तौ गौ हरिणप्लुता सौ स्लौ ग्भौ भौ अपरवक्त्रं नौ ज्लौ ग्नौ जौ पुष्पिताग्रा नौ यौ

जौ जौ गा १२ यवमती जौ जौ जौ जौ गा शिखेकादशैर्विंशतिस्तेन खंजा महत्वपु

जौ ति १३ यतिर्विच्छेदः ननुमध्या त्यौ सौ कुमारललिता ज्सौ गा माणवक्रीडितं

कं भौ तौ लौ चित्रपदा भौ भौ गौ विद्युन्माला मौ मौ गौ भुजगशिशुसृता नौ म् हलमुखी नौ स् भु ॥५

जंगविजृम्भितं पणवो म्नौ यौ रुक्मवती भ्मौ स्गौ मयूरसारिणी र्जौ र्गौ मत्ता म्भौ स्गौ

स्गौ उपस्थिता जौ ज्गौ एकरूप सौ जौ गा इंद्रवज्रा तौ ज्गौ गा उपेंद्रवज्रा ज्तौ ज्गौ गा वाद्यंतावुपजा

लौ २ तयः दोधकं भ्भौ भौ गा शालिनी म्तौ तौ गौ समुद्रतुंगरसर्षयः १४ प्रहर्षिणी म्नौ ज्रौ गिकदश

कौ रुचिरा भौ स्जौ गस्तमुद्रनवकौ मत्तमयूरा म्तौ य्सौ गा असंबाधा म्तौ स्नौ गा विद्युयनवकौ अप

राजिता नौ स्लौ सौ स्वरऋषयः प्रहरणकलिता नौ भौ न्लौ गौ च वसंततिलका त्भौ जौ गौ सिंहोन्नताका

श्यपस्य उद्धर्षिणी सैतवस्य चंद्रावती नौ नौ स्त् मालतीं नवकौ च मणिगुणनिकरो वस्वृषयः म्मा

लिनी नौ म्यौ यौ ऋषभगजविलसितं भ्रौ नौ नौ स्वरनवकौ हरिणी न्सौ म्रौ स्लौ ग्रसससमुद्रऋषयः

पृथ्वी ज्सौ ज्सौ य्लौ ग्वसुनवकौ वंशपत्रपतितं भ्रौ न्भौ न्लौ ग्दिग्रसय मंदाक्रांता म्भौ न्तौ तौ गस

छंदः

५ मुदर्तुस्वराः शिखरिणी य्मौ न्सौ भ्लौ ग्रसरुद्राः कुसुमितलतावेल्लिता म्तौ नयाविंद्रियर्तुस्वराः २८ भातो मस्म्भौ लोग्व भ्रमरविलसितं भौ न्लौ गः रथोद्धता नैलोग स्वागता नेभौ गौ इतो नौ सोगः श्येनी जौ लौ गिः जगती वंशस्थं जतौ जरौ इंद्रवंशा तौ जरौ द्रुतविलंबितं भौ भौ तोटकं सः पुटं नौ म्यौ वसुसमुद्राः जलोद्धतगति जसौ जसौ रसैर्न तं चः भुजंगप्रयातं यः स्रग्वि णीरः प्रमिताक्षरा सजौ सौ वैश्वदेवी मौ यौ विंद्रियर्षयः नवमालिनी नजौ भ्यौ इति २५ ॥ शार्दूलविक्रीडितं मसौ जसौ तौ गादित्यर्षयः सुवदना म्रौ भ्नौ यौ भ्लौ गः स्वरर्तुविरामाः पिंग ५ विलंबितवृत्तं स्रग्धरा म्रौ भ्नौ यौ यौ त्रिः सप्तकाः मदकं भौ नौ नौ नौ गादिगादित्याः अश्वललितं नजौ भ्जौ भ्जौ भ्लौ गुद्रादित्याः मत्ताक्रीडा मौ तौ नौ नौ लौ गृ वसुपंचदशकाः तन्वी भ्तौ नसौ भौ न्यौ द्वादशिताः क्रौंचपदा

छं. भौ स्मौ नौ नौ नौ गृ नेंद्रियवस्वृषयः भुजंगविजृंभितं मौ तौ नौ नौ सौ लौ गौ वसुरुद्रर्षयः अपवाहकं म्नौ नौ नौ नौ सौ गौ नवर्तुरसेंद्रियाणि दंडको नौ रः प्रथमश्चंडवृष्टिप्रयातः अन्यत्र रातमांडव्याभ्यां शेषः प्रति तरति १७ अत्रानुक्तं गाथा द्विकौ ग्लौ मिश्रौ च पृथग्लामिश्राः वसवश्चिकाः लघौ सैकेषु प्र तिलोमगुणं द्विर्लौद्यं ततो गेकं प्राग्रात् द्विरर्धे रूपे शून्यं द्विः शून्ये तावदर्धेतद्गुणितं द्विर्द्व्यूनं च तद्दतानां एकोनैकद्वाः परेपूर्णं परेपूर्णमिति १८ मयहादराधीर्पंचदशांशं देपाउक्षपादः प्रतो क्षिप्त स्त्रापतिकं विरतिर्विंशतिरेकविंशतिर्देवतादिनोदीरशतुः शतं पद्धोविंशतिर्युगवरांतिकात्रयोदश्म रतगावादौ विंशतिर्प्वमलीत्रीणियतिर्विंशतिर्वतोमत्स्यादशप्रहर्षिणी विंशतिः शार्दूलविक्रीडि तं पंचदशाचात्सुकं सप्तदशाष्टादश ७ इति छंदःसमासोयमगमत् श्रीशिवार्पणमस्तु ॥ ॥ प्रसिद्धमपरा अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः

॥शिक्षा॥

र्थमविज्ञातमबुद्धिभिः॥पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं॥२॥त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेम
ताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥३॥स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥यादयश्चस्मृ
ताह्यष्टौचत्वारश्चयमाःस्मृताः॥४॥अनुस्वारोविसर्गश्चकपौचापिपराश्रितौ॥दुःस्पृष्टश्चेतिविज्ञेयौऌ
॥६॥ कारःप्लुतएवच॥५॥आत्माबुध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥मनःकायाग्निमाहंतिसप्रेरयति
मारुतं॥६॥मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं॥प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं॥७॥कंठे
माध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं॥तारंतार्तीयसवनंशीर्षण्यंजागतानुगं॥८॥सोदीर्णोमूर्ध्न्यभिहतो
वक्त्रमापद्यमारुतः॥वर्णांजनयतेतेषांविभागःपंचधास्मृतः॥९॥स्वरतःकालतःस्थानात्प्रयत्नानुप्रदा
नतः॥इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत॥१०॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः॥ह्रस्वोदी ॥६॥
र्घःप्लुतइतिकालतोनियमाअचि॥११॥उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ॥स्वरितप्रभवाह्ये
तेषड्जमध्यमपंचमाः॥१२॥अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा॥जिह्वामूलंचदंताश्चनासिकोष्ठौचता ॥श्रीराम॥

लुच॥१३॥ओभावश्चविवृतिश्चशषसारेफएवच॥जिह्वामूलमुपध्माचगतिरष्टविधोष्म
णः॥१४॥यद्योभावप्रसंधानमुकारादिपरंपदं॥स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्म
णः॥१५॥हकारंपंचमैर्युक्तमंतःस्थाभिश्चसंयुतं॥औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं॥१६॥
कंठ्यावहाविचुयशास्तालव्याओष्ठजावुपू॥स्युर्मूर्धन्याऋटुरषादंत्याऌतुलसाःस्मृताः॥१७॥जि
ह्वामूलेतुकुःप्रोक्तोदंत्योष्ठ्योवःस्मृतोबुधैः॥एऐतुकंठतालव्याओऔकंठोष्ठजौस्मृतौ॥१८॥अ
मात्रातुकंठ्यास्यादेकारैकारयोर्भवेत्॥ओकारौकारयोर्मात्रातयोर्विवृतसंवृतं॥१९॥संवृतंमा
त्रिकंज्ञेयंविवृतंतुद्विमात्रिकं॥घोषावासंवृताःसर्वेअघोषाविवृताःस्मृताः॥२०॥स्वराणामूष्म
णांचैवविवृतंकरणंस्मृतं॥तेभ्योपिविवृतावेङौताभ्यामैचौतथैवच॥२१॥अनुस्वारायम
णांचनासिकास्थानमुच्यते॥अयोगवाहाविज्ञेयाआश्रयस्थानभागिन॥२२॥अलाबु

शिक्षा॥

६॥

[illegible]

लु च ॥२३॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥२४॥ य
द्योभावप्रसंधानमुकारादि परं पदं। स्वरांतं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः॥२५॥ हकारं पंचमैर्यु
क्तमंतस्थाभिश्च संयुतं। औरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतं॥२६॥ कंठ्यावहाविचुयशास्तालव्या
ओष्ठजावुपू। स्युर्मूर्धन्या ऋटुरषा दंत्या ऌतुलसाः स्मृताः॥२७॥ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो
बुधैः। एऐ तु कंठतालव्या ओऔ कंठोष्ठजौ स्मृतौ॥२८॥ अर्धमात्रा तु कंठ्यस्यादेकारैकारयोर्भवे
त्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतं॥२९॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं। घोषा वा संवृ
ताः सर्वे अघोषा विवृताः स्मृताः॥३०॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतं। तेभ्योपि विवृतावेङौ
ताभ्यामैचौ तथैव च॥३१॥ अनुस्वारयमानां च नासिकास्थानमुच्यते। अयोगवाहा विज्ञेया आश्र
यस्थानभागिनः॥३२॥ अलाबुवीणानिर्घोषो दंतमूल्यस्स्वरानन्। अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च॥३३॥

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥२४॥ व्याघ्री यथा हरे-
त्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥२५॥ यथा सौराष्ट्रिका नारी तक्रँ
इत्यभिभाषते । एवं रंगाः प्रयोक्तव्याः खे अराँ इव खेदया ॥२६॥ रंगवर्णं प्रयुंजीरन्नो ग्रसेत्पूर्वमक्षरं । दी-
र्घस्वरं प्रयुंजीयात्पश्चान्नासिक्यमाचरेत् ॥२७॥ हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि । नासिकायां तथार्धं च
रंगस्यैवं द्विमात्रता ॥२८॥ हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन् । मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनं ॥२९॥
मध्ये तु कंपयेत्कंपमुभौ पार्श्वौ समौ भवेत् । सरंगं कंपयेत्कंपं रथीवेति निदर्शनं ॥३०॥ एवं वर्णाः प्रयोक्तव्या ना-
व्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥३१॥ गीती शीघ्री शिरःकंपी तथा लिखितपा-
ठकः । अनर्थज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ॥३२॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसम-
र्थं च षडेते पाठका गुणाः ॥३३॥ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं । काकस्वरं शिरसिगं तथा
स्थानविवर्जितं ॥३४॥ उपांशु दष्टं त्वरितं निरस्तं विलंबितं गद्गदितं प्रगीतं । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दी-

शिक्षा. १७॥

वीणानिर्घोषो दंत्योमूल्यस्त्वरानानु॥ अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥२३॥ अनुस्वारे विवृत्यां
तु विरामे चाक्षरद्वये॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः॥ २४॥ व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च
पीडयेत्॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्॥ २५॥ यथा सौराष्ट्रिका नारी तक्रं इत्यभिभाषते॥ एवं रंगाः प्र
योक्तव्याः खे अरां इव खेदया २६॥ रंगवर्णं प्रयुंजीरन्नो ग्रसेत्पूर्वमक्षरं॥ दीर्घस्वरं प्रयुंजीयात्पश्चान्नासिक्यमा
चरेत्॥ २७॥ हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि॥ नासिकायां तथार्धं च रंगस्यैवं द्विमात्रता॥ २८॥ हृदया
दुत्करे तिष्ठन्कांस्येन समनुस्वरन्॥ मार्दवं च द्विमात्रं च जघन्वां इति निदर्शनं॥ २९॥ मध्ये तु कंपयेत्कंपमुभौ
पार्श्वौ समौ भवेत्॥ सरंगं कंपयेत्कंपं रथीवेति निदर्शनं॥ ३०॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पी
डिताः॥ सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥ ३१॥ गीती शीघ्री शिरःकंपी तथा लिखितपा
ठकः॥ अनर्थज्ञोऽल्पकंठश्च षडेते पाठकाधमाः॥ ३२॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः॥ धैर्यं
लयसमर्थं च षडेते पाठका गुणाः॥ ३३॥ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं॥ काकस्वरं शिरसि
गतं तथा स्थानविवर्जितं॥ ३४॥ उपांशु दष्टं त्वरितं निरस्तं विलंबितं गद्गदितं प्रगीतं॥ निष्पीडितं ग्रस्त

शिक्षा. १७॥

नेन तु सानुनास्यं॥ ३५॥ प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन॥ मध्यंदिने कंठगतेन चैव चक्रा
ह्वसंकूजितसंनिभेन॥ ३६॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यं॥ मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरस्थितेन॥ ३७॥ अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः॥ शेषाः स्पृष्टा हलः प्रोक्ता निबोधा
नुप्रदानतः॥ ३८॥ ञमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः॥ ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः॥ ३९॥
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते॥ दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि॥ ४०॥ छंदः पादौ तु वे
दस्य हस्तौ कल्पोऽथ पठ्यते॥ ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥ ४१॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकर
णं स्मृतं॥ तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥ ४२॥ उदात्तमाख्याति वृषोऽंगुलीनां प्रदेशिनीमूलनिवि
ष्टमूर्धा॥ उपांतमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव॥ ४३॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोंगुलिं॥ नि
हतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकां॥ ४४॥ नेजं त्यादिकनिघ्नादि तथैवानामिकांतिके मध्यमांगुलिमध्यके

स्वरन्यासं विधीयते ॥ ४५ ॥ अनोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितं । मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदा
त्तमिति नवपदशय्या ॥ ४६ ॥ अग्निः सोमः प्रवो वीर्यं हविषां स्व बृहस्पती रिंद्राबृहस्पती ॥ अग्निरित्यंतोदात्तं
सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितं ॥ ४७ ॥ हविषां मध्योदात्तं स्वरिति स्वरितं बृहस्प
तीरिति द्व्युदात्तमिंद्राबृहस्पतीरिति त्र्युदात्तं ॥ ४८ ॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः स्वरितः क
र्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४९ ॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः । शिखी रौति त्रिमात्रं तु
नकुलस्त्वर्धमात्रकं ॥ ५० ॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितं । न तस्य पाठे मोक्षोस्ति पापाहेरिव कि
ल्बिषात् ॥ ५१ ॥ सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितं सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५२ ॥
मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपरा
धात् ॥ ५३ ॥ अवक्षरमनायुष्यं विस्वरं व्याधिपीडितं । अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥ ५४ ॥ हस्तहीनं

॥ ९ ॥
॥ श्रीराम ॥

तु योधीते स्वरवर्णविवर्जितं । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५५ ॥ हस्तेन वेदं योधीते स्वरवर्णा
र्थसंयुतं । ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५६ ॥ शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते । वा
ङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५७ ॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याक
रणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५८ ॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः । तमश्चाज्ञानजं भिन्नं त
स्मै पाणिनये नमः ॥ ५९ ॥ अज्ञानांधस्य लोकस्य ज्ञानांजनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणि
नये नमः ॥ ६० ॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः । स भवति धनधान्यप
शुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति ॥ ६१ ॥ अथ शिक्षामात्मोदात्तश्च हकारं स्वरा
णां यत्रामी लश्चोदात्तं चापि स्कं शंकर एकादश ॥ ६५ ॥ इति वेदांग शिक्षा समाप्ता ॥
हरिः ॐ ॥ पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं । दिनर्त्वयनमासांगं प्रणम्य शिरसा शुचिः ॥ १ ॥

ज्योतिष

१

प्रणम्य शिरसा कालमभिवाद्य सरस्वतीं । कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥२॥ ज्योतिषामयनं कृ-
त्स्नं प्रवक्ष्याम्यनुपूर्वशः । विप्राणां संमतं लोके यज्ञकालार्थसिद्धये ॥३॥ निरेकं द्वादशाभ्यस्तं द्विगुणं गतसंयु-
तं । षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ॥४॥ स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ । स्यात्तदादि
युगं माघस्तपः शुक्लोऽयनं ह्युदक् ॥५॥ प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् । सार्पार्धे दक्षिणार्कस्तु माघश्रा-
वणयोः सदा ॥६॥ घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ । दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्ययनेन तु ॥७॥
द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदश । चतुर्थं दशमं चैव द्विर्युग्माद्यं बहुलेऽप्यृतौ ॥८॥ वसुस्त्वष्टा भवोऽज-
श्च मित्रः सर्पोऽश्विनौ जलं । धाता कश्चायनाद्याः स्युरर्धपञ्चमभस्त्वृतुः ॥९॥ भांशाः स्युरष्टकाः कार्याः पक्षा
द्वादशकोद्गताः । एकादशगुणश्चोनः शुक्लेऽर्धं चैन्दवा यदि ॥१०॥ कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः ॥
ऊनस्थाने द्विसप्तत्यामुद्वपेदूनसंमिताः ॥११॥ त्र्यंशो भशेषो दिवसांशभागश्चतुर्दशस्याप्युपनीय भिन्नं । भा

॥ १ ॥

॥ श्रीरामः ॥

र्धेऽधिके चाधिगते परेंऽशे द्वावुत्तमेऽङ्केऽनवके च वेद्यौ ॥१३॥ पक्षात्पञ्चदशाग्रोर्ध्वं तद्भुक्तमिति निर्दिशेत् ॥ नवतिश्चद्ग-
तोंऽशः स्यादूनोंऽशद्व्यधिकेन तु ॥१५॥ जौ द्राघः खे श्वे ही रो षा चिन्मूषण्यः सूमाधानः रे मृघाः स्वापोजः कृष्यो हज्येष्ठा
इत्यृक्षा लिङ्गैः ॥१६॥ जावाद्यंशैः समं विद्यात्पूर्वार्धे पर्व सूत्तरे । भादानं स्याच्चतुर्दशीकाष्ठानां देविना कला ॥१७॥
कलादशसविंशा स्याद्द्विमुहूर्तस्तु नाडिके । नाडिके द्वे मुहूर्तस्तु पञ्चाशन्नाधिकं भवेत् ॥१८॥ नाडिके द्वे मुहूर्तस्तु पञ्चा-
शत्पलमाढकं । माषकात्कुम्भको द्रोणः कुटपैर्वर्धते त्रिभिः ॥१९॥ ससप्तकुम्भयुक्स्यायनः सूर्यादीनि त्रयोदश । नवमा-
नि पञ्चाह्नः कालपञ्चाक्षराः स्मृताः ॥२०॥ श्रविष्ठाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत् । सूर्यान्मासान्षडभ्य-
स्तान्विद्याच्चान्द्रमसानृतून् ॥२१॥ अतीतपर्वभागेषु शोधयेद्द्विगुणां तिथिम् । तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः ॥
२२॥ याः पर्वभादानकलास्तासु सप्तगुणां तिथिम् । प्रक्षिपेत्कलासमूहस्तु विद्याद्दानकीः कलाः ॥२३॥ यदुत्तरस्या-
यनतोऽयनं स्याच्छेषं तु यद्दक्षिणतोऽयनस्य । तदेव षष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणं ॥२४॥ यद

ज्यो॰ र्धं दिनभागानां सदापर्वणिपर्वणि ॥ ऋतुशेषं तु तद्विद्यात्संख्याय सहपर्वणां ॥ २३ ॥ इत्युपायसमुद्देशो भूयो
येनप्रकल्पयेत् ॥ ज्ञेयराशिंगताभ्यस्तान्विभजेज्ज्ञानराशिना ॥ २४ ॥ अग्निः प्रजापतिः सोमो रुद्रो दितिर्बृहस्पतिः
१० सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च ॥ २५ ॥ सविता त्वष्टाथ वायुश्चेंद्राग्नी मित्र एव च ॥ इंद्रो निर्ऋतिरापो वै विश्वे
देवास्तथैव च ॥ २६ ॥ विष्णुर्वसवो वरुणोजएकपात्तथैव च ॥ अहिर्बुध्न्यस्तथा पूषाश्विनौ यमएव च ॥ २७ ॥ नक्ष
त्रदेवता एता एताभिर्यज्ञकर्मणि ॥ यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं ॥ २८ ॥ इत्येतन्मासवर्षाणां मुहू
र्तोदयपर्वणां ॥ दिनर्त्वयनमासांगव्याख्यानं लगधो ब्रवीत् ॥ २९ ॥ सोमसूर्यस्त्रिचरितो लोकान्लोके च
संमितं ॥ सोमसूर्यस्त्रिचरितं विद्वान्वेदविदश्नुते ॥ ३० ॥ विषुवन्तं गुणं द्वाभ्यां रूपहीनं तु षड्गुणं ॥ यल्लब्धं
तानि पर्वाणि तथा ऊर्ध्वं सा तिथिर्भवेत् ॥ ३१ ॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः ॥ युगस्य पंच वर्षाणि का १०
लज्ञानं प्रचक्षते ॥ ३२ ॥ तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीं ॥ षष्ठीं च विषुवान्प्रोक्तो द्वादश्यां च समं भवेत् ॥ ३३ ॥ श्रीराम

चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चंद्रमाः ॥ माघशुक्लाह्निको युंक्ते श्रविष्ठायां च वार्षिकीं ॥ ३४ ॥
यथा शिखा मयूराणां नागानां मणयो यथा ॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धनि स्थितं ॥ ३५ ॥ वे
दा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ॥ तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वे
द स वेद यज्ञान् ॥ ज्योतिषं वेद स वेद यज्ञानिति ॥ ३६ ॥ इति वेदांगशिक्षा [illegible] रहितं
समाप्तं ॥ ७ ॥ श्रीभवानीशंकरार्पणमस्तु ॥ श्रीशके १६५४ वदचतुर्थी समाप्तम्
श्रीरस्तु ॥ श्रीरस्तु

श्री श्री

[redacted]

श्री [redacted] श्रीगुरवेनमः सांब

श्री श्री